ॐ

# श्री कामाक्षि स्तोत्रम् ।

कारणापरचिद्रूपा कञ्चीपुरसीम्नि कामपीठगता ।
कांचन विहरति करूणा काश्मीरस्तबककोमलाङ्गलता ॥ १ ॥

कंचन काञ्चीनिलयं करधृतकोदण्डबाणसृणिश्म् ।
कठिनस्तनभरनम्रं कैवल्यानन्दकन्दमवलम्बे ॥ २ ॥

ऐश्वर्यमिन्दुमौलेः ऐकात्म्य प्रकृतिकाञ्चिमध्यगताम्
ऐन्दवकिशोरशेखर मैदंपर्यं चकास्ति निगमानाम् ॥ ३ ॥

लीये पुरहृजाये माये तव तरूणपल्लवच्छाये ।
चरणे चन्द्रभरण काञ्चीशरणे नतार्तिसंहरणे ॥ ४ ॥

कामपरिपन्थिकामिनि कामेश्वरी कामपीठमध्यगते ।
कामदुधा भव कमले कामकले कामकोटि कामाक्षी ॥ ५ ॥

समरविजयकोटी साधकानन्दधारी
मृदुगुणपरिपेटी मुख्यकादम्बवाटी ।
मुनिनुतपरिपाटी मोहिताजाण्डकोटी परमशीववधूटी
पातु मां कामकोटी ॥ ६ ॥

जय जय जगदम्ब शिवे जय जय कामाक्षी जय जयाद्रिसुते ।
जय जय महेशदयिते जय जय चिद्गगनकौमुदी धरे ॥ ७ ॥

---

*Please send corrections to - Dhrup Chand (dchand@concentric.net)*